# 2019

## SANSKRIT — HONOURS

**Paper : CC–4**

**(Section – A to C)**

**[Unit : I + II + III]**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

### Unit – I

**(Marks : 30)**

1. अधस्तनेषु **दशानां प्रश्नानाम्** अतिसंक्षिप्तम् उत्तरं देयम् (संस्कृतभाषया देवनागरलिपिम् च आश्रित्य) : 2×10

(a) इन्द्रियेभ्यः परं किम्? तस्मादपि परं किम्?

(b) 'मनःषष्ठानीन्द्रियाणि ———— कर्षति'— अत्र उचितपदेन रिक्तस्थानं पूरयत।

(c) श्रीमद्भगवद्गीतायाः चतुर्दशपञ्चदशाध्याययोर्नामद्वयम् उल्लिख्यताम्।

(d) प्रकृतिः कतिविधा? काश्च ताः?

(e) ज्ञानेन्द्रियपञ्चकस्य विषयाः के?

(f) प्रकृतिसम्भवा गुणाः कतिविधाः? नामतः तेषाम् उल्लेखः करणीयः।

(g) सत्त्वगुणस्य स्वरूपं कीदृशम्?

(h) देहिनं कर्मसङ्गेन निबध्नाति को गुणः? स गुणः कुतः समुद्भवति?

(i) तमः कस्मात् जायते? तत् देहिनं कैः दोषैः निबध्नाति?

(j) 'मनश्चायम्' इत्यत्र सन्धिविच्छेदः कार्यः।

(k) 'खम्' इत्यस्य प्रतिशब्दो लिख्यताम्।

(l) कानि खलु पञ्चेन्द्रियाणि?

(m) रजोगुणात् के जायन्ते?

2. अधोलिखितयो**रेकस्य** संस्कृतभाषया देवनागरलिपिम् आश्रित्य सप्रसङ्गं व्याख्या कार्या – 6×1

(a) देहिनोऽस्मिन् यथा **देहे** कौमारं यौवनं जरा।
तथा **देहान्तरप्राप्ति**र्धीरस्तत्र न मुह्यति॥

(b) **सत्त्वात्** सञ्जायते ज्ञानं रजसो लोभ एव च।
**प्रमादमोहौ** तमसो भवतोऽज्ञानमेव च॥

3. (a) विग्रहवाक्यम् उल्लिख्य समासो निरूपणीयः (संस्कृतभाषया देवनागरलिपिमाश्रित्य) 2×2

(i) देहान्तरप्राप्तिः (प्र.2.a)

(ii) प्रमादमोहौ (प्र.2.b)

**अथवा**

(b) निम्नलिखितयोः कारकमुल्लिख्य विभक्तिर्निर्णेया – 2×2

(i) देहे (प्र.2.a)

(ii) सत्त्वात् (प्र.2.b)

**Unit – II**

**(Marks : 15)**

4. (a) गुणतः बुद्धिः कतिविधा? तासां स्वरूपम् आलोचनीयम्। 10

**अथवा,**

(b) सर्वकर्मणां सिद्धये पञ्च कारणानि श्रीमद्भगवद्गीतामनुसृत्य पर्यालोच्यन्ताम्। 10

5. अधोलिखितयो**रेकस्य** मातृभाषया अनुवादः कर्तव्यः। 5×1

(a) योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।
सिदध्यसिदध्योः समो भूत्वा समत्वं योग उच्यते॥

(b) न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।
तत् स्वयं योगसंसिद्धः कालेनात्मनि विन्दति॥

## Unit – III

### (Marks : 20)

6. अधोलिखितेषु कस्यापि **द्वयस्य** टीका संस्कृतभाषया देवनागरलिपिमाश्रित्य लेखनीया – 5×2

श्रेयः, श्रद्धा, योगः, मत्कर्मकृत्।

7. कीदृशो नीतिपरायणो भक्तो भगवता श्रीकृष्णेन प्रशंसितः? 10

**अथवा**

"कर्मण्येवाधिकारस्ते मा फलेषु कदाचन" — इति वचनं श्रीमद्भगवद्गीतायाः कस्मिन् अध्याये उपलभ्यते? कोऽत्र वक्ता? उक्तेरस्यास्तात्पर्यं विशदीक्रियताम्। 1+1+8